"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते" सू० सि० ।

**त्रिंशक** त्रि० त्रिंशता क्रीतः वुन् डिच्च । त्रिंशत्संख्यान्वित-द्रव्येण क्रीते वस्तुनि ।

**त्रिंशत्** स्त्री० त्रयो दशतः परिमाणमस्य नि० । १तद्गणकसं-ख्यायां २तत्संख्यान्विते च । तत्संख्येये "निमेषा दश चाष्टौ च काष्ठा त्रिंशत्तु ताः कलाः। त्रिंशत् कला मुहूर्त्तः स्यादहोरात्रन्तु तावतः" "त्रिंशद्वर्षो वहेत् कन्यां हृद्यां द्वादशवार्षिकीम्" मनुः "संख्यायां "तत्त्रिंशता भवे-न्मासः" सू० सि० ।

**त्रिंशत्क** त्रि० त्रिंशत्परिमाणमस्य कन् । १त्रिंशत्परिमाणे अवयवे कन् । २तत्संख्यायाम् "अमावास्याः पृथक् तेषां त्रिंशत्कं परिचक्षते" कामन्द० ।

**त्रिंशति** स्त्री त्रिंशत्+पृषो० । १त्रिंशत्संख्यायां २तत्संख्येये च ।"पञ्चकं मण्डलं ज्ञेयं त्रिंशत्याञ्च मनीषिभिः"काम०

**त्रिंशत्तम** त्रि० त्रिंशतः पूरणः तमप् । १त्रिंशत्संख्यापूरणे स्त्रियां ङीप् । "ततस्त्रिंशत्तमे व्यूहे पङ्क्तिष्वतिष्ठन्त" शत०ब्रा० १०।४।२।२२ ।

**त्रिंशत्पत्र** न० त्रिंशत्संख्यानि पत्राणि दलानि प्रतिपुष्प-मस्य । १कुमुदे शब्दमाला ।

**त्रिंशांश** पु० त्रिंशस्त्रिंशत्पूरणोऽंशः । राशेस्त्रिंशत्पूरणे भागे षष्टिकलात्मके भागे षड्वर्गान्तर्गतानां राशिभेदे तेषामंशविशेषाणामधिपतयः ज्यो० उक्ता यथा

"पञ्च पञ्चाष्टसप्ताक्षा विषमे त्रिंशदंशकाः । माहे-यशनिजीवज्ञशुक्राणां व्युत्क्रमात् समे" । विषमराशौ कुजशनिगुरुबुधशुक्राणां पञ्च पञ्चाष्टसप्तपञ्चमितास्त्रिंशां-शकाः क्रमात् ज्ञेयाः । समे राशौ व्युत्क्रमात् तेषां विपर्य्ययेण त्रिंशांशा ज्ञेयाः । यथा मेषो विषमराशिः तत्र प्रथमावधिपञ्चांशा भौमस्य । षष्ठांशमारभ्य दशमां-शपर्य्यन्तं पञ्चांशाः शनेः । एकादशांशमारभ्याष्टादशांश-पर्य्यन्तमष्टावंशा गुरोः । ऊनविंशांशमारभ्य पञ्चविंशांश-पर्य्यन्तं सप्तांशा बुधस्य । ततः षड्विंशांशमारभ्य त्रिं-शांशपर्य्यन्तं पञ्चांशाः शुक्रस्य त्रिंशांशाः क्रमात् ज्ञेयाः। मिथुनसिंहतुलाधनुःकुम्भेष्वप्येवम् । समराशौ व्युत्-क्रमाद्यथा । वृषे प्रथमांशमारभ्य पञ्चांशा भृगोः । ततो द्वादशांशपर्य्यन्तं सप्तांशा बुधस्य, ततो विंशांश-पर्य्यन्तमष्टावंशा गुरोः । ततः पञ्चविंशांशपर्य्यन्तं पञ्चांशाः कुजस्य त्रिंशांशाः । एवं कर्ककन्यावृश्चिकमकरमीनेष्वपि बोध्याः। त्रिंशदंशका इत्यत्र वृत्तौ त्रिभागवत् पूरणार्थता

**त्रिंशिन्** त्रि०त्रिंशत् प्रमाणमस्य इनि डिच्च । त्रिंशत्प्रमाणे स्त्रियां ङीप् ।

**त्रिक** न०त्रयाणां संघः कन् ।१त्रितयसङ्ख्यायाम् २पृष्ठवंशाधो-भागे,३कटिभागे,४त्रिफलायाम् (हरितक्यामलकीवयस्या-फलत्रये) ५त्रिकटुनि, (शुण्ठीपिप्पलीमरिचत्रये) । वा-तादिषु मिलितेषु त्रिषु कायति कै-क । ६गोक्षुरे पु० अमरः । ७त्रिपथसंस्थाने हेम० । ८त्रिमदे "गुडूची-सारसंयुक्तात् त्रिकत्रयसमन्वयात् । वातरक्तं नि-हन्त्याशु सर्वरोगहरन्त्वयः" सुखबोधः त्रिकत्रयं त्रिकटु-त्रिमदम् त्रिफलम् चेति त्रयमित्यर्थः ।"युगं सस्तूत्कारवि-वर्त्तितत्रिकः" माघः । "व्यपोढपार्श्वैरपवर्त्तितत्रिका" किरा० । "त्रिफला तु फलत्रिकम् "कश्चिद्विवृत्तत्रि-कभिन्नहारः" रघुः । "एकं द्विकं त्रिकं चैव चतुष्कं पञ्चकं तथा" हारिका० । तृतीयेन क्रमेण ग्रहणं यस्य कन् पूरणप्रत्ययस्य वा लुक् । ९तृतीयके त्रि० । त्रयः अधिकाः शुल्कं लाभो वृद्धिर्वा यत्र शतादौ १०त्र्यधिकलाभादियुक्ते शतादौ । "द्विकं त्रिकं चतुष्कञ्च पञ्चकञ्च शतं समम् । मासस्य वृद्धिं गृह्णीयात् वर्णाना-मनुपूर्वशः"मनुः। (शतकरा तिनटाका सुद) "त्रिकगस्त्वोः पृष्ठवंशास्थ्नोर्यः सन्धिस्तत्त्रिकं स्मृतम्" इत्युक्ते ११सन्धिभेदे न०।

**त्रिककुद्** पु० त्रीणि ककुदतुल्यानि शृङ्गाण्यस्य ककुदस्य अन्त्यलोपः समा० । त्रिकूटाख्ये पर्वतभेदे अमरः । पर्वत एवास्य अन्त्यलोपः नान्यत्र । तत् त्रिककुद तद्युक्ते त्रि० । २विष्णावपि पु० वा अन्त्यलोपः । "तथैवाथ त्रिककुदो वाराहं रूपमास्थितः । त्रिककुत् तेन विख्यातः शरीरस्य प्रमापणात्" भा० शा० ३४४ अ० । ३दशरात्र-साध्ये यज्ञभेदेऽपि वा अन्त्यलोपः । "त्रिककुद्वा एष यज्ञो यद्दशरात्रः ककुत् पञ्चदशः ककुदेकविंशः ककुत्त्रय-स्त्रिंशो य एवं विद्वान् दशरात्रेण यजते त्रिककुद एव समानानाम्" तै०स०७।२।५।२ । "चतुष्टोमात् समूढा त्रिककुदः शस्तम् अथ महात्रिककुदस्य, छन्दोमत्रिककुदस्य" शा० श्रौ० १६।२६।१४ । "यत्र वा इन्द्रो वृत्रमहंस्तस्य यदक्ष्यासीत्तं गिरिं त्रिककुदमकरोत्" शत० ब्रा०३।१।३। १२।"वर्षिष्ठः पर्वतानां त्रिककुन्नाम ते पिता"अथ०४।६।८।

**त्रिककुभ्** पु० त्रेधा कं पीतमुदकं स्कुभ्नाति स्कुभ् किप् छान्दसः सलोपः । १उदाने वायौ "उदानो वै त्रिककुप्छन्दः"शत०ब्रा०८।५।२।४। २नवरात्रसाध्ये यज्ञ-